National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(65): 305-308
© 2026 NJHSR
www.sanskritarticle.com

**ऐन्दवी आर्या**
शोधच्छात्रा,
अनुसन्धानप्रकाशनविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**ऐन्दवी आर्या**
शोधच्छात्रा,
अनुसन्धानप्रकाशनविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# पाणिनिकातन्त्रव्याकरणयोः कारकलक्षणविमर्शः

**ऐन्दवी आर्या**

**शोधसारः -**

वेदाङ्गभूते व्याकरणशास्त्रेऽन्तर्भूतानां कारकाणां माहात्म्यं वाक्यनिर्माणावसरे सर्वैरप्यनुभूयत एव। क्वचिद्व्याकरणस्य विदुषामपि एतस्य कारकशब्दस्य लक्षणनिरूपणे वैमत्यं दरीदृश्यते। सम्प्रति अस्मिन् शोधलेखे नवविधव्याकरणेषु सुप्रसिद्धेऽकालके पाणिनीयव्याकरणे शर्ववर्मणा च विरचिते कातन्त्रव्याकरणे कारकलक्षणविषयिणी भेदः सारूप्यञ्च निरूपयिष्यते। पाणिनीयेऽपि व्याकरणे कौमुदीकारमञ्जूषाकारादीनां तदीयभेदः प्रत्यपादि।

**कारकम् -**

दार्शिनकदृष्ट्या क्रियाकारकसम्बन्धमेव साध्यसाधनमित्युच्यते। यतः क्रिया साध्या भवति, तस्याः क्रियायाः सिद्धिः कारकैर्क्रियते इत्यतः तेषां कारकाणामेव साधनमिति नामान्तरम्। एवं रीत्या उभयोः साध्यसाधनत्वम्। अतः भर्तृहरिणापि **"सामर्थ्यं साधनं विदुः"**[1] इत्यत्र कारकाणामेव 'साधनम्' इति पदेन उल्लेखो कृतः। एवमेव अन्यत्रापि शास्त्रे साधनशब्देन कारकाणां बोधः परिकल्पितः। विभिन्नेषु व्याकरणशास्त्रेषु कारकाणां बोधनक्रमः द्विधा वर्त्तते। तत्र पूर्वम् अपादानम्, सम्प्रदानम्, करणम्, अधिकरणम्, कर्म, कर्त्ता इत्यनेन प्रकारेण प्रथमः क्रमः एवञ्च कर्ता, कर्म, अधिकरणम्, करणम्, सम्प्रदानम्, अपादानम् इत्यपरः क्रमः। पाणिनीयव्याकरणे प्रथमः क्रमः आश्रितः। कातन्त्रव्याकरणे शर्ववर्मणा अपि तेनैव क्रमेण सूत्राणि विरचितानि, परं कातन्त्रे करणकारकम् अधिकरणात् परं प्रोक्तम् अधिकरणञ्च पूर्वं तथा च पाणिनीये तद्विपरीतम् इति स एव भेदः दृश्यते उभयत्र।

**कारकलक्षणम् -**

व्याकरणशास्त्रे कारकम् इत्यस्य लक्षणविषये विदुषां मतभेदो दृश्यते। तत्र प्रमुखतया दीक्षितनागेशादीनां कारकलक्षणगतो भेदः अत्र उपस्थाप्यते। महर्षिपाणिनिना त्वष्टाध्याय्यां प्रथमाध्यायस्य चतुर्थे पादे **"कारके"**[2] इति सूत्रमेकं रचयामास। अनेन सूत्रेण कारकसंज्ञा सिध्यति तद्वदेव अस्य कारकस्य अधिकारोऽपि साधितः येन सूत्रमिदं संज्ञासूत्रम् अधिकारसूत्रञ्च भवति। अत्र कौमुदीभूषणकारयोः कारकलक्षणं प्रथमतया प्रतिपाद्यते।

**कौमुदीभूषणकारौ -**

किं नाम कारकम् इति चेत् - **"क्रियान्वयित्वं कारकत्वम्"**[3] इत्युच्यते दीक्षितेन। कारकमित्यस्य करोति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्तेः क्रियायां यस्य अन्वयः सिध्यति तस्यैव कारकसंज्ञा स्यात् इति तदभिमतम्। एवं प्रकारेण कर्तृकर्मकरणसम्प्रदानापादानाधिकरणानां षण्णां कारकत्वम्, सम्बन्धस्य तु क्रियान्वयाभावात् न तस्य कारकत्वमित्युच्यते। भूषणसारे कौण्डभट्टेन **"कारकशब्दो हि क्रियापरः करोति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्तेः"**[4] अनेन "कारके" इति सूत्रगतस्य कारकशब्दस्य क्रिया इत्यर्थपरकत्वं

निरूपितम्। क्रिया एव कर्मादीन् उत्पादयति इति हेतोः क्रिया एव कारकमित्यनेन अभिधीयते। अपादानादिषु संज्ञासूत्रेषु **"कारके"** इति सूत्रानुवर्त्तनात् कारकेऽर्थात् क्रियायां येषामन्वयः भवति तेषामेव अपादानादितत्तत् संज्ञात्वं सिद्ध्यति। एतच्च कारकमिति पदं योगरूढम्, वाक्ये क्रियया एव कर्तृकर्मादीनां ज्ञानं भवतीति कारणात् क्रिया एव कारकम्। एवञ्च कारके इत्यस्य अनुवर्त्तनात् अपादानाद्यः संज्ञाः क्रियान्वयिनामेव सिध्यन्तीति कौण्डभट्टेन तत्र प्रपञ्चितम्।

**लघुमञ्जूषाकारः -**

"क्रियान्वयित्वं कारकत्वम्" इति दीक्षितमतं खण्डयति नागेशभट्टः। डुकृञ् करणे इत्यस्मात् भ्वादिधातोः **"कर्त्तरि कृत्"**[5] इति सूत्रेण कृत्संज्ञकानां प्रत्ययानां कर्त्तरि विधानात् **"ण्वुल्तृचौ"**[6] इत्यनेन सूत्रेण ण्वुल् प्रत्ययः कर्त्रर्थे जायते वुकारस्य स्थाने अकादेशे सति कारकशब्दोऽयं निष्पद्यते। कारक इति यौगिकेन शब्देन यः करोति सः कारक इत्यनेन कर्तृबोधः जायते। अत एव भाष्ये - **"अन्वर्थसंज्ञा यथा विज्ञायेत करोतीति कारकम्"**[7] इत्युक्तम्। यद्यपि पूर्वोक्तप्रकारेण कारकशब्दस्य शब्दमर्यादया क्रियान्वयित्वमर्थः न भासते इति हेतोः न तल्लक्षणं साधुः पुनरपि प्रकारान्तरेण पूर्वोक्तस्य लक्षणस्य असाधुत्वं प्रदर्श्यते मञ्जूषाकारेण। कारकाणां भावनान्वयः इति यो प्रामाणिको व्यवहारः तत्र यदि कारकशब्दस्य क्रियान्वयि इत्यर्थपरकत्वं चेत्तर्हि क्रियान्वयिनां क्रियायाम् अन्वयः इत्यर्थः स्यात् यच्च न युज्यते। अथवा दीक्षितेनैव प्रयुक्तस्य - "अधिकरणस्य कारकत्वेन क्रियान्वयः" इति वाक्यस्यापि अर्थसमन्वयो न स्यात्। अतः कारकशब्दस्य क्रियान्वयित्वं नार्थः। एवमेव भूषणसारे कौण्डभट्टेन कारकशब्दस्य क्रियार्थकत्वं यन्निरूपितं तदपि असाधु एव। कारकस्य शब्दमर्यादया क्रिया इत्यप्यर्थः न भवति। तथा च कारकाणां भावनायामन्वयः इत्यादिः पूर्वोक्तः दोष अत्रापि सङ्गच्छते। एवमेव यदि क्रियान्वयिनामेव तत्तत्संज्ञात्वं तर्हि आधारस्य अधिकरणसंज्ञा न सिद्ध्येत् तस्य साक्षात् क्रियायाम् अन्वयाभावात् इत्यपि दोषान्तरो भवति।

नागेशस्तु "क्रियाजनकत्वशक्तिः कारकम्" इति द्रव्यगता या क्रियाजनकरूपा शक्तिः तस्याः शक्तेः कारकत्वमङ्गीकरोति। कारक इति शब्दस्य शब्दमर्यादया अपि करोति क्रियां निष्पादयति इत्येवार्थभासः। तत्र भाष्यमपि प्रमाणयति - "करोतीति कारकम्" इति भाष्ये उक्तत्वात्। कैय्यटेनापि "करोतिः निर्वर्त्तनार्थकः" इति करोति इति क्रियायाः निर्वर्त्तनार्थकत्वं प्रतिपादितम्। क्रियाजनकशक्तेरेव कारकत्वमित्यत्र वाक्यपदीयस्यापि प्रमाणं दर्शयति नागेशः -

**स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।**
**क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः॥**[8] इति

अनेन ज्ञायते यत् भर्तृहरेरपि द्रव्यगतायाः शक्तेरेव कारकत्वम् अभिमतम् इति।

**द्रव्यस्य कारकत्वविमर्शः -**

द्रव्यगतशक्तेः कारकत्वविषये प्रश्नो जायते यत् कुतः शक्तेः कारकत्वं तदाश्रयस्य द्रव्यस्यैव कारकत्वं स्यात् इति चेत् उच्यते तत्र - **"द्रव्यस्य कारकत्वे तस्य एकरूपत्वेन कार्यवैचित्र्यानुपपत्तिः"**[9] इति। द्रव्यमेकविधं तत्रस्थाः शक्तयः अनेकविधाः। द्रव्यस्य कारकत्वं चेत् यदि घटस्य कर्तृत्वमिष्टं तर्हि तस्य तन्मात्रमेव स्यात् येन घटं पश्यति, घटेन जलमाहरति, घटे स्थाप्यते इत्यादयः प्रयोगाः न स्युः। सर्वविधशक्तीनामाश्रयत्वं द्रव्यस्य विद्यते इति हेतोः तत्रस्था या शक्तिः तस्याः कारकत्वं सम्पादितम्। यस्मिन् काले यस्याः शक्तेः विवक्षा तां शक्तिं बोधयितुं प्रत्ययविशेषस्य विधानम्। अस्मिन् विषये वाक्यपदीये - **"वस्तुतः तदनिर्देश्यं न हि वस्तु व्यवस्थितम्"**[10] इति प्रकृते सप्तम्यन्तात् वस्तु इति शब्दात् तसि प्रत्यये वस्तुतः इति सिद्धे वस्तुनि इत्यर्थः गम्यते। पदार्थेषु कर्तृत्वादिकं न निश्चितं यत् एतत् वस्तुविशेषः कर्त्ता एव भवति, करणमेव भवति अथवा इदमेव वस्तु कर्त्ता इत्यादिरूपेण। एवं प्रकारेण व्यवस्था नैव कृता इति तदर्थः लभ्यते।

यदि शक्तिमात्रस्य साधनत्वं तर्हि भाष्यविरोधः स्यात् यतः भाष्ये द्रव्यस्यापि साधनत्वं प्रतिपादितं क्वचित्। यथा - **"द्रव्यं क्रियाभिनिर्वृत्तिं प्रति साधनत्वमुपैति"**[11] इति भाष्ये, तद्वदेव **"साधनं वै द्रव्यम्"**[12] इति रूपेण भाष्यप्रयोगाः दृश्यन्ते। यत्र न तु द्रव्यस्थशक्तिः अपितु साक्षात् द्रव्यमेव साधनमिति प्रोक्तम्। शक्तिर्साधनमिति मन्यमाने एतद्भाष्यविरोधः स्यात्। तथा च लोकेऽपि द्रव्याणां कारकत्वेन व्यवहारः दृश्यते। यथा - चैत्रः स्थाल्यां तण्डुलं पचति इत्यत्र चैत्रस्य कर्तृत्वं तण्डुलानां कर्मत्वं स्थाल्याश्च करणत्वमित्यादिकः व्यवहारः कथं भवति तत्तच्छक्तेः खलु तत्तत्कारकत्वं स्यात् इति चेत् उच्यते - शक्तिशक्तिमतोरभेदः इति। यद्यपि द्रव्यशक्ती भिद्येते तथापि आरोपितः अभेदः स्वीक्रियते। अतः केषुचित् स्थलेषु शक्त्याविष्टस्य द्रव्यस्यापि साधनत्वमिति व्यवहारो दृश्यते।

तथा च **"अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रति-शब्दप्रादुर्भावपश्चाद्यथा-नुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु"**[13] इति सूत्रेण विभक्त्यर्थे वर्त्तमानस्य अव्ययस्य समर्थेन सुबन्तेन सह अव्ययीभावः समासः विधीयते। यदि द्रव्यं साधनमित्युच्यते तर्हि हरौ इति अधिहरिः इत्यत्र हरिशब्देनैव अधिकरणस्यापि भानमिति हेतोः पुनः तस्मिन्नेवार्थे विद्यमानेन अधि इति अव्ययेन सह समसनेन उक्तार्थानामप्रयोगः इति पुनरुक्तिदोषः स्यात्। येन विभक्त्यर्थाव्ययेन सह समासः एव न युज्येत। अतः द्रव्यस्य न कारकत्वमिति सिद्धम्। पुनः प्रश्नः जायते यत् **"हरतेर्दृतिनाथयोः पशौ"**[14] **"शिल्पिनि ष्वुन्"**[15] इत्यादिषु सूत्रेषु कर्तरि इति अनुवर्त्तते तेन पशौ कर्तरि, शिल्पिनि

कर्तरि इत्यर्थः लभते। पशुः कर्त्ता भवति चेत् हृधातोः इन् प्रत्ययो भूत्वा दृतिहरिः पशुः, तद्वदेव शिल्पी यदा कर्त्ता तदानीं धातोः ष्वुन् प्रत्ययः तेन नर्त्तकः इत्यादीनि रूपाणि सिध्यन्ति। यदि शक्तेः कारकत्वव्याप्यकर्तृत्वकर्मत्वादिकमिति चेत् प्रकृते पशोः अथवा शिल्पिनः कर्तृत्वं न स्यात् अतः द्रव्यमेव साधनमिति न्याय्यम् इति चेन्न। कर्तरि इत्यनेन कर्तृत्वशक्त्याश्रयः यो पशुः अथवा शिल्पी इति रूपेण उभयोः सामानाधिकरण्यमिष्टं तत्र न तु पशोः अथवा शिल्पिनः कर्तृत्वे इत्यर्थः। अत एव न्यासे पदमञ्जर्याञ्च उक्तं यत् - पशौ कर्तरि इत्यत्र पशुशब्दः प्रत्ययस्य योऽर्थः कर्ता इति तस्य विशेषणं भवति न तु कर्त्रर्थं बोधयतीति।

**कातन्त्रे कारकम् -**

किं नाम कारकमिति न क्वचित् कातन्त्रे व्याख्यातम्। तस्मिन् सन्दर्भे प्रायः अर्थलाघवार्थं सर्वविदितत्वाच्च अस्मिन् व्याकरणे कारकार्थविचारः न कृतः इति पूर्वाचार्याणां मतं विद्यते। कातन्त्रव्याकरणे तु सूत्रकारः न कुत्रचित् साक्षात् कारकत्वं निरूपयति। कलापे कारकनिरूपणं न विद्यते इत्यत्र तस्यैव व्याकरणस्य कातन्त्रवृत्तिपञ्जिका इत्यख्यस्याः टीकाकारः त्रिलोचनदासेन स्वटीकायां हेतुसंज्ञा विधायके **"कारयति यः सः हेतुश्च"**[16] इति सूत्रप्रसङ्गे दुर्गसिंहकृतवृत्तौ कृतस्य कारकलक्षणस्य प्रयोजनं प्रतिपादयन् उच्यते - अपादानादीनां षण्णां कारकत्वं केन प्रमाणेन उच्यते **"न ह्येतदर्थं सूत्रमस्ति"** इति। अनेन ज्ञायते अस्मिन् व्याकरणे कारकमिति संज्ञा विशेषतया न कृता। यदि कारकं न संसूचितं मास्तु कारकव्यवहारः को दोषः इति चेत् तस्मिन्नेव व्याकरणे चतुर्थाध्यायस्य पञ्चमे पादे विद्यमानस्य **"अकर्तरि च कारके संज्ञायाम्"**[17] इति सूत्रगतस्य कारकशब्दस्य बोधो न स्यात् अतः वृत्तिकारेण अस्मिन्नेव सूत्रे कारकत्वं निरूपितम्। कातन्त्रवैय्याकरणैः अभिमन्यन्ते यत् एषा कारकसंज्ञा लोकतः सिद्धा। सा च संज्ञा क्रियायां यस्य निमित्तत्वं तस्यैव सिध्यतीति। एतदेव दुर्गसिंहः अस्यैव सूत्रस्य वृत्तौ वक्ति यत् - **"क्रियानिमित्तं कारकं लोकतः सिद्धम्"** इति। क्रियानिमित्तमात्रं प्रधानम् अप्रधानं वा यतः क्रिया भवति, तत् क्रियानिमित्तम् इतिरूपेण लक्षणे विद्यमानस्य नपुंसकलिङ्गस्य विवरणं प्रदीयते टीकायाम्। करोतीति कारकः इत्यस्मिन् पक्षे तु कर्त्रर्थे विद्यमानः ण्वुल्प्रत्ययः, येन कारकः इति प्रधानकर्तृपर्यायवाचकत्वं बोध्यते। तादृक्कर्तृत्वं तु अप्रधानत्वात् इतरेषु कारकेषु न भवतीत्यतः न तल्लक्षणं कारकस्य। क्रियानिमित्तं कारकमित्येव साधुरिति दुर्गसिंहः।

**दुर्गसिंहकृतकारकलक्षणविमर्शः -**

लक्षणमेतत् इतरैः वैय्याकरणैः नैय्यायिकैश्च नाङ्गीक्रियते। यतः लक्षणेऽस्मिन् द्वौ दोषौ विद्येते अव्याप्तिरतिव्याप्तिरिति। अतिव्याप्तिः सम्बन्धादिषु दृश्यते यथा - चैत्रस्य तण्डुलं पचति। यथा चैत्रः स्थाल्यां तण्डुलं पचति इत्यत्र चैत्रादीनां विक्लित्त्यनुकूलव्यापारे पाककर्मणि निमित्तत्वात् कर्त्रादिसंज्ञात्वं तद्वदेव प्रकृते चैत्रस्य तण्डुलं पचति इत्यत्रापि चैत्रेण विना तण्डुलपाकस्य अशक्यत्वात् चैत्रस्य क्रियायां निमित्तत्वं सिद्धं येन तस्यापि कारकत्वं प्राप्नोति यन्नेष्टम् इति अतिव्याप्तिदोषः लक्षणे। यद्यपि एतादृशस्य कारकत्वस्य सम्बन्धेऽपि विद्यमानत्वं तथापि सम्बन्धस्य न कारकत्वम्, लोके कारकशब्दस्य कर्त्रादिषु षट्स्वेव रूढत्वात् इति केचन कातन्त्रवैय्याकरणाः। एतदेव कविराजसुषेणशर्मणा विरचितायां कलापचन्द्र इति कातन्त्रसूत्रटीकायां कारकलक्षणस्य विचारणावसरे उच्यते - **"सम्बन्धस्य क्रियानिमित्तत्वेऽपि षट्सु कारकशब्दस्य रूढत्वान्न कारकत्वमिति संक्षेपः"** इति। द्वितीयो दोषः - घटं करोति इत्यादिषु स्थलेषु यत्र निर्वर्त्यं कर्म भवति अर्थात् तादृक्कर्म यस्य क्रियायाः व्यापारात् पूर्वम् अविद्यमानत्वं तथा क्रियायाः व्यापारेणैव निर्मीयते तन्निर्वर्त्यं कर्म इत्युच्यते। यथा लेखं लिखति, वाक्यं वदति इत्यादिषु स्थलेषु लेखनक्रियया एव लेखनिर्माणं, क्रियायाः पूर्ववर्तित्वं न तस्य इति हेतोः निर्वर्त्यमेतत्कर्म। एवं प्रकारेण सम्प्रति निर्माणात् पूर्वं कम्बुग्रीवादिमतः घटस्य सत्वाभावात् व्यापारेणैव सिद्धत्वाच्च घटपदार्थः निर्वर्त्यकर्म। यदि क्रियायाः निमित्तपदार्थानामेव कारकत्वं स्वीक्रियते चेत् निमित्तस्य कारणपरकत्वात्, कारणस्य च कार्यात् नियतरूपेण पूर्ववर्त्तित्वाच्च घटलेखादीनां क्रियायाः पूर्ववर्तित्वं सिध्येत्, तच्च निर्वर्त्यकर्मत्वात् न सिध्यति। अतः तेषां कर्मणां कारकत्वमेव न स्यात् इति अव्याप्तिदोषः। अस्मिन् प्रसङ्गे केचन विद्वांसः- यद्यपि व्यापारात् पूर्वं घटाभावः तथापि बुद्धौ घटपदार्थरूपज्ञानस्य घटस्य च अव्यक्ततया सूक्ष्मरूपेण स्वकारणे विद्यमानत्वाच्च नायमव्याप्तिदोषः इत्येवं प्रकारेण समादधति।

अस्मिन् कातन्त्रव्याकरणे सर्वेषां कारकाणां प्रायः एकैकं संज्ञासूत्रं विरच्य अन्यत्र तु व्याख्यानतः विशेषप्रतिपत्तिः भवति इति हेतोः व्याख्यानात् इतरेषां कारकत्वं साधितं शर्ववर्मणा। सर्वत्र कातन्त्रवैय्याकरणैः, दुर्गसिंहवृत्तौ, दुर्गसिंहटीकायां तथैव अन्यास्वपि टीकासु पाणिनिना विरचितानि बहूनि सूत्राणि प्रत्याख्यातानि। यथा कर्मसंज्ञायाः प्रसङ्गे **"तथायुक्तं चानीप्सितम्"**,**"अकथितञ्च"**[18] इत्यादीनि तथा च द्वितीयाविभक्तिविषयेऽपि **"कालाध्वनोरत्यन्तसंयोगे"**[19] इत्यादीनि। एतैः सूत्रैः कृतानि सर्वाण्यपि कार्याणि व्याख्यानात् प्रकारान्तरेण वा सिध्यन्तीति कातन्त्रवैय्याकरणानाम् अभिमतम्।

**कारकमिति अन्वर्थसंज्ञा -**

उपदेशकाले केषां शब्दानाम् उपदेशः कर्त्तव्यः शब्दानां अवा अपशब्दानाम् अथवा उभयोः इति प्रश्ने भाष्यकारः - लघुत्वात् शब्दानामेव उपदेशः कर्त्तव्यः यतः एकस्य शब्दस्य बहवः अपभ्रंशशब्दाः भवन्ति। तेषां सर्वेषाम् अपशब्दानाम् उपदेशस्तु गौरवाय कल्प्यते शब्दोपदेशस्तु लघीयान् अतः शब्दोपदेश एव न्याय्यः। एवं रीत्या शास्त्रनिर्माणावसरे लघुत्वात् यथा शब्दोपदेशो

कृतः तद्वदेव शास्त्रे शब्दानाम् अथवा वर्णानां संक्षेपेण निर्देशार्थं कृत्रिमाः संज्ञाः परिकल्पिताः। संज्ञायाः प्रयोजनमुच्यते भाष्यकारः - **"लघ्वर्थं संज्ञाकरणम्"**[20] इति। यथा - **"तरप्तमपौ घः"**[21] इति तरप्तमपोः निर्देशार्थं तयोः घ इति संज्ञा कृता। तयोः तथैव निर्देशः सूत्रेषु दृश्यते यथा **"नाद्घस्य"**[22] इत्यत्र छन्दसि नुडागमविधानावसरे नान्तात् उत्तरस्य, घस्य इत्यनेन तरप्तमपोः ग्रहणम्, एतयोः नुडागमः स्यात्। तेन दस्युहन्तमः, सुपथिन्तरः इत्यादीनि उदाहरणानि सिध्यन्ति। तद्वदेव **"दाधाघ्वदाप्"**[23] इत्यनेन घुसंज्ञा, **"अचोऽन्त्यादि टि"**[24] इत्यनेन च टिसंज्ञा इत्याद्यः। अनेन प्रकारेण अस्मिन् शास्त्रे एकमप्यक्षरं नाप्यधिकं न च न्यूनम्। अत एव प्रसिद्धिर्वर्त्तते यत् - **"अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैय्याकरणाः"**[25] इति। यदि लघ्वर्थमेव संज्ञाकरणं तर्हि प्रकृते कारकम् इति कुतः बृहती संज्ञा एकाक्षरात्मिका द्व्यक्षरात्मिका वा संज्ञा क्रियेत इति चेत् समाधीयते भाष्ये - **"अन्वर्थसंज्ञा यथा विज्ञायेत"**[26] इति। संज्ञाघटितैः शब्दैरेव अर्थज्ञानं यया लभ्यते सा अन्वर्थसंज्ञा इत्युच्यते। सम्प्रति करोतीति कारकम् इति प्रकारेण तस्याः अन्वर्थत्वमुच्यते भाष्यकारेण। यदि करोतीति कारकम् इत्येव तदर्थश्चेत् प्रधानकर्त्तुरेव कारकत्वं कर्तृभिन्नानां कर्मकरणादीनां कारकत्वं न सम्भवेत् इति चेत् **"सिद्धं तु प्रतिकारकं क्रियाभेदात्पचादीनां करणाऽधिकरणयोः कर्तृभावः"**[27] इति वार्त्तिकमुच्यते भाष्यकारैः। अयमर्थः सकृत्क्रियां प्रति एकैकस्यापि कारकस्य व्यापारः भिद्यते। यथा देवदत्तः काष्ठैः स्थाल्यां तण्डुलं पचति इत्यत्र यद्यपि प्रकृतधातुवाच्यविक्लित्त्यनुकूल-व्यापाराश्रयत्वात् देवदत्त एव प्रधानकर्त्ता तथापि धारणक्रियां कुर्वती स्थाली अपि पचति, ज्वलनक्रियां कुर्वन्ति काष्ठान्यपि पचन्ति एवमेव विक्लिद्यदोदनमपि पचत्येव। एवं प्रकारेण सर्वेषु कारकेषु व्यापारो भवत्येव इति हेतोः तां क्रियामाश्रित्य सर्वेषां कारकत्वं सिध्यति। एतदेव अभिप्रैति भर्तृहरिरपि -

**निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके।**
**व्यापारभेदापेक्षायां करणादित्वसम्भवः॥**[28]

विक्लित्त्यादिफलनिष्पादने तु स्वस्वव्यापारद्वारा कर्तृत्वं तु सर्वेषु कारकेषु भवति। यदा कः केन किं कस्मिन् पचति इति विशेषाकाङ्क्षा जायते तदानीं तत्तत्कारकनिष्ठव्यापारवशात् कारकत्वव्याप्यकर्म-करणादीनि सिध्यन्ति इति तदर्थः। एवं प्रकारेण कारकसंज्ञायाः अन्वर्थत्वं साधयन्ति भाष्यकाराः।

**उपसंहारः -**

इत्थम् अत्र पाणिनीयव्याकरणे नागेशदीक्षितयोः कारकलक्षणविषये मतभेदः विद्यते। एवमेव कातन्त्रव्याकरणस्य व्याख्याकारेण दुर्गसिंहेन यल्लक्षणं कारकस्य निरुक्तं तत्रापि तस्यैव व्याकरणस्य अन्यो वैय्याकरणः दोषान् प्रादर्शयत्। पाणिनीयवैय्याकरणानां मते तु दोषाः भवन्त्येव। तथा च करोति क्रियां निर्वर्त्तयति इत्येव कारकलक्षणं साधु भाष्यसम्मतत्वात् इति सिध्यति।

**उपयुक्तग्रन्थसूची -**

वैय्याकरणसिद्धान्तलघुमञ्जूषा - राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः, प्रथम संस्करण - २०२१

वैय्याकरणभूषणसारः - चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, तृतीय संस्करण - २००१

कातन्त्रव्याकरणम् - डा.हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी, प्रथम संस्करण २०००

वैय्याकरणसिद्धान्तकौमुदी-मोतीलाल बनारसीदास, दिल्ली २०१९

परिभाषेन्दुशेखरः - चौखम्बा सुरभारती प्रकशन, वाराणसी २०२२

महाभाष्यम् - श्री मोतीलाल बनारसीदास, दिल्ली २०२५

अष्टाध्यायी सूत्रपाठः - रामलाल कपूर ट्रस्ट गुरुबाजार, अमृतसर, पंजाब, द्वितीय संस्करण - २०००

वाक्यपदीयम् - तेलुगु एकाडमी, हैदराबाद, प्रथम संस्करण - १९७४

कारकसम्बन्धोद्द्योतः - राजस्थानी ग्रन्थागार, जोधपुर, राजस्थान, प्रथम संस्करण – २००८

**पादटिप्पणी -**

1 वाक्यपदीयम् - ३.७.१
2 पाणिनिसूत्रपाठः – १.४.२३
3 प्रौढमनोरमा – १.४.४९
4 भू.सा.धात्वनिर्णय-१६
5 पाणिनिसूत्रपाठः – ३.४.६४
6 पाणिनिसूत्रपाठः – ३.१.१३३
7 महाभाष्यम् आ–३
8 वा.प.- ३-७-१
9 वै.सि.ल.म.द्वितीयार्थविचारः
10 वा.प.३.७.९१
11 म.भा.आ.४
12 पाणिनिसूत्रपाठः.५.३.५५
13 पा.सू.२.१.६
14 पा.सू.३.२.२५
15 पा.सू.३.१.१४५
16 कातन्त्रव्याकरणम्.२.४.१५
17 का.व्या.४.५.४
18 पा.सू. – १.४.५०/५१
19 पा.सू.– २.३.५
20 म.भा.आ ३
21 पा.सू..१.१.२२
22 पा.सू.८.२.१७
23 पा.सू.१.२.२०
24 पा.सू.१.१.६४
25 परि.शे.१३३
26 म.भा.आ.३
27 म.भा.आ.३
28 वा.प.३.७.१८